# सुन्दरकाण्ड त्रयोविंशः सर्गः (२३) - ॥ रक्षसीप्रेरणम् ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रु रावणः ।
सन्दिश्य च ततः सर्वा राक्षसीर् निर्जगाम ह ॥ १ ॥

निष्क्रान्ते राक्षसेन्द्रे तु पुन रन्तःपुरं गते ।
राक्षस्यो भीम रूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥

ततः सीता मुपागम्य राक्षस्यः क्रोध मूर्छिताः ।
परं परुषया वाचा वैदेहीमिद मब्रुवन् ॥ ३ ॥

पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः ।
दशग्रीवस्य भार्या त्वं सीते न बहु मन्यसे ॥ ४ ॥

ततस्त्वेक जटा नाम राक्षसी वाक्य मब्रवीत् ।
आमन्त्र्य क्रोध ताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥

प्रजापतीनां षण्णां तु चतुर्थो यः प्रजापतिः ।
मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥

पुलस्त्यस्य तु तेजस्वी महर्षिर् मानसः सुतः ।
नाम्ना स विश्रवा नाम प्रजापति समप्रभः ॥ ७ ॥

तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ।
तस्य त्वं राक्षसेन्द्रस्य भार्या भवितु मर्हसि ॥ ८ ॥

मयोक्तं चारु सर्वाङ्गि वाक्यं किं नानुमन्यसे ।
ततो हरिजटा नाम राक्षसी वाक्य मब्रवीत् ॥ ९ ॥

विवर्त्य नयने कोपान् मार्जार सदृशेक्षणा ।
येन देवास् त्रयस् त्रिशद् देवराजश्च निर्जिताः ॥ १० ॥

तस्य त्वं राक्षसेन्द्रस्य भार्या भवितु मर्हसि ।
ततस्तु प्रघसा नाम राक्षसी क्रोध मूर्छिता ॥ ११ ॥

भर्त्सयन्ती तदा घोर मिदं वचन मब्रवीत् ।
वीर्योत्सिक्तस्य शूरस्य सङ्ग्रामेष् वनिवर्तिनः ॥ १२ ॥

बलिनो वीर्य युक्तस्य भार्यात्वं किं न लप्स्यसे ।
प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः ॥ १३ ॥

सर्वासां च महाभागां त्वामुपैष्यति रावणः ।
समृद्धं स्त्रीसहस्रेण नाना रत्नोप शोभितम् ॥ १४ ॥

अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः ।
अन्या तु विकटा नाम राक्षसी वाक्य मब्रवीत् ॥ १५ ॥

असकृद्देवता युद्धे नाग गन्धर्व दानवाः ।
निर्जिताः समरे येन स ते पार्श्व मुपागतः ॥ १६ ॥

तस्य सर्व समृद्धस्य रावणस्य महात्मनः ।
किमद्य राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे ॥ १७ ॥

ततस्तु दुर्मुखी नाम राक्षसी वाक्य मब्रवीत् ।
यस्य सूर्यो न तपति भीतो यस्य च मारुतः ॥ १८ ॥

न वाति स्मा यतापाङ्गे किं त्वं तस्य न तिष्ठसि ।
पुष्पवृष्टिं च तरवो मुमुचुर् यस्य वै भयात् ॥ १९ ॥

शैलाश्च सुभ्रूः पानीयं जलदाश्च यदेच्छति ।
तस्य नैर्ऋत राजस्य राजराजस्य भामिनि ॥ २० ॥

किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ।
साधु ते तत्त्वतो देवि कथितं साधु भामिनि ।
गृहाण सुस्मिते वाक्य मन्यथा न भविष्यसि ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥